 ISSN 976-8645

# गुणप्रकर्षो दिवसोऽयमागतः



बिपिनकुमारझा[2]

अध्यात्माश्रिता विजयादशमी व्यतीता। साम्प्रतिकोऽयं कालः लोकतन्त्रपर्वणः। दीपोत्सवः आगन्तुकः एव। एतेषां मध्ये एव गुणप्रकर्षोऽयं दिवसः। अयं च कालः नूतनाङ्कस्य प्रकाशनस्य। पत्रिकासञ्चालनकार्यं सर्वथा दुष्करं कार्यमिति समीचीनमेव काचिदुक्तिः। यदि तत्र साफल्यं स्यात् तु पुत्रजन्मोत्सवेति मोदस्य विषयः। अस्तु एतत्प्रकाशनं सफलं न वेति तत्तु भवन्तः एवात्र प्रमाणम्।

हर्षस्य विषयोऽयं यत् प्रथमादङ्कादारभ्य प्रकृताङ्कं यावत् ये अङ्काः दृग्गोचरीभूताः तत्र ये प्रतिनिधिभूताः लेखाः वर्तन्ते तेषां ग्रन्थरूपे प्रकाशनं भविष्यतीति निश्चितः। प्रकृते अङ्के कानिचित् परिवर्तनानि अपि जातानि आशासे तत्र भवन्तोभवन्तः तान्युररी करिष्यन्ति।

विद्वत्पादपांसुलः,

**बिपिनकुमारझा**

बलाहरः, हि.प्र.

**********************************************************

[2] प्रकाशकः सम्पादकश्च